**CLASS : 10th (Secondary)** **Code No. 1109**

**Series : Sec/Annual Exam.-2024**

रोल नं० | | | | | | | | | | |

**SET : C**

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** तथा प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टलेखः लेखनीयः।*

**खण्डः 'क'**

**(अपठितावबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिख्यन्ताम् –

यः जनः धार्मिकः विनीतः परोपकारी सदाचारी च भवति, स सज्जनः कथ्यते। सज्जनः परेषाम् उपकारं करोति, सदा परेषां दुःखे दुःखी भवति। स यथा वदति तथैव करोति, स यथा करोति तथैव वदति। तस्य वचने कार्ये च एकता भवति। स परेषाम् उपकारं धर्मं मन्यते। स सर्वेषु दयां करोति। स सुखे अति हर्षं न प्राप्नोति, न च दुःखे अधिकं खेदम् अनुभवति। स सदा प्रियं हितं च वचनं वदति। स विपत्तौ धैर्यम् आश्रयते, सम्पत्तौ विनीतः भवति, यशसि रुचिं करोति, सभासु च मधुरं भाषणं ददाति। तस्मात् सज्जनः सदैव वन्दनीयः भवति।

***प्रश्नाः –***

(अ) एकपदेन उत्तरं दीयताम् (केवलं ***प्रश्नद्वयम्*** ) – $2 \times 1 = 2$

(क) सज्जनः विपत्तौ किम् आश्रयते ?

(ख) सज्जनः सदैव कीदृशः भवति ?

(ग) परेषाम् उपकारं कः करोति ?

(ब) पूर्णवाक्येन उत्तरं दीयताम् (केवलं ***प्रश्नद्वयम्***) – 2 × 2 = 4

(क) सज्जनः किं धर्मं मन्यते ?

(ख) सज्जनः कीदृशं वचनं वदति ?

(ग) कः सज्जनः कथ्यते ?

(स) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं संस्कृतेन लिख्यताम्। 1

(द) यथानिर्देशम् उत्तरं लिख्यताम् (केवलं ***प्रश्नत्रयम्***) – 3 × 1 = 3

(i) 'सदा परेषां दुःखे दुःखी भवति' इत्यत्र क्रियापदं किम् ?

(क) परेषाम् (ख) दुःखे

(ग) भवति (घ) दुःखी

(ii) 'सज्जनः सदैव वन्दनीयः भवति' इत्यत्र 'सज्जनः' पदस्य विशेषणं किम् अस्ति ?

(क) सदा (ख) एव

(ग) भवति (घ) वन्दनीयः

(iii) 'अपकारम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) उपकारम् (ख) परेषाम्

(ग) धार्मिकम् (घ) स्वीकारम्

(iv) 'स सदा प्रियं हितं च वचनं वदति' इत्यत्र 'वदति' क्रियायाः कर्तृपदं किम् ?

(क) सदा (ख) हितम्

(ग) स (घ) च

## खण्डः 'ख'

## (रचनात्मक-कार्यम्)

**2.** (क) भवान् वर्चस्वः। स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति लिखितं पत्रं मञ्जूषागतपदैः पूर्य्यताम् – 4

परीक्षाभवनम्
23.03.2024

प्रियमित्र अंशुल!
सप्रेम नमः।
अत्र कुशलं तत्रास्तु। अहम् अधुना स्वविद्यालयस्य वर्णनं कर्तुम् .... (i) .....। मम विद्यालयस्य भवनम् अतीव ..... (ii) .... अस्ति। अस्य ..... (iii) ... अपि विशालं हरितं चास्ति। सर्वे ..... (iv) .... परिश्रमशीलाः छात्राश्च अनुशासिताः सन्ति। विस्तरेण पुनः लेखिष्यामि।

भवतः मित्रम्
वर्चस्वः।

*मञ्जूषा*

| क्रीडाप्राङ्गणम्, शिक्षकाः, सुन्दरम्, इच्छामि |
|---|


(ख) प्रदत्तचित्रं दृष्ट्वा मञ्जूषागतपदैः रिक्तस्थानानि पूर्य्यन्ताम् – 4

(i) जन्तून् दृष्ट्वा ............. प्रसीदन्ति।

(ii) अस्माकं राष्ट्रियः पक्षी ............. नृत्यति।

(iii) इदं ............. चित्रम् अस्ति।

(iv) पञ्जरेषु ............. वर्तन्ते।



***मञ्जूषा***

| बालाः, मयूरः, जन्तवः, जन्तुशालायाः |
|---|

**खण्डः 'ग'**

**(पठितावबोधनम्)**

**3.** प्रदत्तगद्यांशस्य हिन्दीभाषया सप्रसङ्गं सरलार्थः लिख्यताम् – 4 × 1 = 4

एकः सिंहः सुखेन विश्राम्यते, तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति, परं वानरस्तु कूर्दित्वा वृक्षमारूढः। तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।

**अथवा**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

**4.** प्रदत्तपद्यांशस्य हिन्दीभाषया सप्रसंङ्गं सरलार्थः लिख्यताम् – 4 × 1 = 4

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,

बली बलं वेत्ति न वेत्ति निर्बलः।

पिको वसन्तस्य गुणं न वायसः,

करी च सिंहस्य बलं न मूषकः।।

**अथवा**

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्,

वाष्पयानमाला संधावति वितरन्ती ध्वानम्।

यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्,

शुचि पर्यावरणम् ......................।।

**5.** अधोलिखितासु सूक्तिषु कयोश्चन ***द्वयोः*** भावार्थः हिन्दीभाषया लिख्यताम् – 2 × 2 = 4

(क) शिशुजनो वयोऽनुरोधाद् गुणमहतामपि लालनीय एव।

(ख) जननी तुल्यवत्सला।

(ग) क्रोधो हि शत्रुः प्रथमो नराणाम्।

(घ) आचारः परमो धर्मः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयः मञ्जूषागतपदैः पूर्य्यताम् – 4

पिता यच्छति पुत्राय, बाल्ये विद्याधनं महत्।

पिताऽस्य किं तपस्तेपे, इत्युक्तिस्तत्कृतज्ञता।।

अन्वयः -

पिता .......... बाल्ये महत् ........... यच्छति,

अस्य पिता किं ........... तेपे, इत्युक्तिः तत् ..........।।

***मञ्जूषा***

| कृतज्ञता, पुत्राय, विद्याधनम्, तपः |
|---|

**6.** अधोलिखितं गद्यांशमाधृत्य पूर्णवाक्येन संस्कृतभाषया उत्तराणि लिख्यन्ताम् – $3 \times 1 = 3$

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहिताम् एकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

**प्रश्नाः** (केवलं ***प्रश्नत्रयम्*** ) –

(क) पादध्वनिना कः प्रबुद्धः ?

(ख) दैवगतिः कीदृशी अस्ति ?

(ग) चौरः कुत्र प्रविष्टः ?

(घ) चौरः किम् आदाय पलायितः ?

**7.** अधोलिखितं पद्यमाधृत्य संस्कृतभाषया पूर्णवाक्येन उत्तराणि लिख्यन्ताम् – $2 \times 1 = 2$

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

**प्रश्नाः** (केवलं ***प्रश्नद्वयम्*** ) -

(क) मनुष्यः किं कृत्वा नावसीदति ?

(ख) मनुष्याणां महान् रिपुः किम् अस्ति ?

(ग) उद्यमसमः कः नास्ति ?

**8.** रेखाङ्कितपदानि आधृत्य कोष्ठकगतपदैः प्रश्ननिर्माणं क्रियताम् (केवलं ***प्रश्नत्रयम्*** ) — 3 × 1 = 3

(क) सुराधिपः ताम् अपृच्छत्। (कः/कस्य)

(ख) त्वं मानुषात् बिभेषि। (कस्मात्/कस्याः)

(ग) मयूरस्य नृत्यं प्रकृतेः आराधना। (कस्य/कस्याः)

(घ) चातकः वने वसति। (कुत्र/कदा)

**9.** प्रश्नपत्रस्य श्लोकान् विहाय ***'शेमुषी-2'*** पाठ्यपुस्तकस्य ***एकः*** श्लोकः शुद्धं पूर्णं च संस्कृतभाषया लिख्यताम्।

4 × 1 = 4

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**10.** (क) कर्मकारकस्य ***अथवा*** अपादानकारकस्य हिन्दीभाषया परिभाषा संस्कृतभाषया च उदाहरणं लिख्यताम्।

2 × 1 = 2

(ख) यण्सन्धेः ***अथवा*** विसर्गसन्धेः हिन्दीभाषया परिभाषा संस्कृतभाषया च उदाहरणं लिख्यताम्। 2 × 1 = 2

(ग) अव्ययीभावसमासस्य ***अथवा*** द्वन्द्वसमासस्य हिन्दीभाषया परिभाषा संस्कृतभाषया च उदाहरणं लिख्यताम्।

2 × 1 = 2

**11.** यथानिर्दिष्टं शब्दरूपाणि लिख्यन्ताम् (केवलं ***प्रश्नचतुष्टयम्*** ) – $4 \times 1 = 4$

(i) 'किम्' (नपुं०) - शब्दस्य प्रथमा-एकवचनम्।

(ii) 'राम' – शब्दस्य चतुर्थी-एकवचनम्।

(iii) 'मुनि' – शब्दस्य तृतीया-बहुवचनम्।

(iv) 'पितृ' - शब्दस्य द्वितीया-एकवचनम्।

(v) 'भगवत्' (पुं०) - शब्दस्य षष्ठी-द्विवचनम्।

(vi) 'नदी' - शब्दस्य द्वितीया-बहुवचनम्।

**12.** यथानिर्दिष्टं धातुरूपाणि लिख्यन्ताम् (केवलं ***प्रश्नचतुष्टयम्*** ) – $4 \times 1 = 4$

(i) 'सेव्' - धातोः लोट्लकारः, उ० पु० द्विवचनम्।

(ii) 'भू' – धातोः लृट्लकारः, प्र० पु० एकवचनम्।

(iii) 'हस्' - धातोः लोट्लकारः, उ० पु० बहुवचनम्।

(iv) 'गम्' - धातोः विधिलिङ्, म० पु० द्विवचनम्।

(v) 'हन्' - धातोः लट्लकारः, प्र० पु० एकवचनम्।

(vi) 'याच्' - धातोः लृट्लकारः, म० पु० बहुवचनम्।

**13.** अधोलिखितवाक्येषु कोष्ठकाद् उचितविभक्तिकं पदं चित्वा लिख्यताम् (केवलं ***प्रश्नचतुष्टयम्*** ) – 4 × 1 = 4

(i) तस्मै श्रीमते ………… नमः। (गुरुम्/गुरवे)

(ii) स ………… निष्क्रम्य बहिः आगच्छत्। (गृहात्/गृहेण)

(iii) गृहस्थः ……….. आश्रयं प्रायच्छत्। (अतिथये/अतिथेः)

(iv) तौ ………… प्रति प्रस्थितौ। (न्यायाधिकारिणम्/न्यायाधिकारिणे)

(v) ………… विना जीवनं न सम्भवति। (जलस्य/जलम्)

**14.** अधोलिखितवाक्येषु कोष्ठकात् समुचितम् अव्ययपदं चित्वा लिख्यताम् (केवलं ***प्रश्नद्वयम्*** ) – 2 × 1 = 2

(i) अस्मिन् प्रदूषणे ………… श्वासरोगाः जायन्ते। (एव/न)

(ii) इदानीं वायुमण्डलं ………… प्रदूषितम् अस्ति। (भृशम्/बहिः)

(iii) यत्र हरीतिमा, ……….. शुचि पर्यावरणम्। (तत्र/कुत्र)

**15.** प्रदत्तपदेषु उपसर्गान् चित्वा लिख्यताम् (केवलं ***प्रश्नद्वयम्*** ) – 2 × 1 = 2

(i) सुभाषितानि।

(ii) प्रविशति।

(iii) अनुगच्छति।

**खण्डः 'ङ'**

**(पाठाधारिताः बहुविकल्पीय-प्रश्नाः)**

**16.** प्रदत्तविकल्पेषु उत्तरं चित्वा लिख्यताम् – $16 \times 1 = 16$

(क) 'हन् + क्त' इति प्रकृतिप्रत्यय-योगेन रूपं भवति –

(I) हतः (II) हतवान्

(III) हन्तः (IV) हन्त

(ख) 'गन्तुम्' इत्यत्र प्रत्ययः अस्ति –

(I) ल्युट् (II) क्त

(III) तुमुन् (IV) तव्यत्

(ग) 'एकोनषष्टिः' इत्यस्य संख्यापदं भवति –

(I) 69 (II) 59

(III) 79 (IV) 89

(घ) '45' इत्यस्य संस्कृतपदम् अस्ति –

(I) चतुःपञ्चाशत् (II) पञ्चचत्वारिंशत्

(III) पञ्चपञ्चाशत् (IV) चतुश्चत्वारिंशत्

(ङ) 'हृदयग्राही स्पर्शः' इत्यत्र विशेष्यपदम् अस्ति –

(I) हृदय (II) ग्राही

(III) हृदयग्राही (IV) स्पर्शः


(च) 'समरूपः कुटुम्बवृत्तान्तः' इत्यत्र विशेषणपदम् अस्ति –

(I) समरूपः (II) सम

(III) कुटुम्बवृत्तान्तः (IV) वृत्तान्तः

(छ) घटिकासमयः संस्कृतपदेन लिख्यताम् –

वर्चस्वः रात्रौ ............. वादने शेते।





(I) दश (II) नव

(III) एक (IV) द्वादश

(ज) घटिकासमयः संस्कृतपदेन लिख्यताम् –

स्वस्तिः प्रातः ........... वादने उत्तिष्ठति।




(I) चतुर् (II) पञ्च

(III) षड् (IV) द्वादश

(झ) 'द्वौ + अपि' इत्यस्य सन्धिपदम् –

(I) द्वौऽपि (II) द्वावपि

(III) द्ववपि (IV) द्वावापि

(ञ) 'यदुक्तम्' इत्यस्य विच्छेदः अस्ति –

(I) यत् + उक्तम् (II) यदा + उक्तम्

(III) यदु + उक्तम् (IV) यद् + उक्तम्

(ट) 'मलेन सह' इत्यस्य समस्तपदम् –

(I) समलः (II) सामलम्

(III) मलयुक्तम् (IV) समलम्

(ठ) 'वाक्पटुः' इत्यस्य विग्रहः अस्ति –

(I) वाचं पटुः (II) वाचि पटुः

(III) वाचः पटुः (IV) वाचे पटुः

(ड) 'पुत्रः' इत्यस्य पर्यायपदं नास्ति –

(I) तनयः (II) सुतः

(III) सूनुः (IV) जनकः

(ढ) 'चित्तम्' इत्यस्य पर्यायपदम् अस्ति –

(I) मानसम् (II) चरणम्

(III) नयनम् (IV) शिरः

(ण) 'सुलभः' इत्यस्य विलोमपदम् अस्ति –

(I) अलभः (II) दुर्लभः

(III) अलोभः (IV) निर्लभः

(त) 'प्रथमः' इत्यस्य विलोमपदम् अस्ति –

(I) अन्तः (II) अन्तिमः

(III) प्रारम्भः (IV) दशमः